शिखण्डिका, स्त्री, शिखा । यथा,—
"चूड़ा केशी केशपाशी शिखा शिखण्डिका
समा: ॥"
इति हेमचन्द्र: ॥

शिखण्डिनी, स्त्री, (शिखण्डश्चूड़ा अस्त्यस्या इति । इनि । ङीप् ।) यूथिका । गुञ्जा । इति मेदिनी ॥ द्रुपदराजकन्या । (यथा, महाभारते ।५।१८९।२।
"कन्या शिखण्डिनी जाता पुरुषो वै निवे-
दित: ॥")
सा यक्षस्य पुंस्त्वग्रहणेन पुरुषो भूत्वा शिखण्डीति नाम्ना ख्यात: । एतद्विवरणं महाभारते । ५ । १९० अध्यायमारभ्य विशेषतो द्रष्टव्यम् ॥ मयूरी । शिखण्डिन्-शब्दात् स्त्रियां ईप्प्रत्ययेन निष्पन्ना ॥ ( विजिताश्वराजस्त्री । यथा, भागवते । ४ । २४ । ३ ।
"अपत्यत्रयमाधत्त शिखण्डिन्यां सुसम्मतम् ॥"
शिखण्डविशिष्टा । यथा, महाभारते । ४ । ३५ । १ ।
"सा प्राद्रवत् काञ्चनमाल्यधारिणी
ज्येष्ठेन भ्रात्रा प्रहिता यशस्विनी ।
सुदक्षिणा वेदिविलग्नमध्या
सा पद्मपत्राभनिभा शिखण्डिनी ॥")

शिखण्डी, [न्] पुं, मयूरपुच्छ: । गाङ्गेयारि: । स तु द्रुपदराजपुत्र: । ( अस्य जन्मादिविवरणं महाभारते । ५ । १९० अध्याये द्रष्टव्यम् ॥ ) मयूर: । इति मेदिनी ॥ ( यथा, रघु: ।१।३९।
"षड्जसंवादिनी: केका द्विधाभिन्ना: शिख-
ण्डिभि: ॥")
कुक्कुट: । वाण: । इति हेमचन्द्र: ॥ गुञ्जा । स्वर्णयूथिका । इति राजनिर्घण्ट: ॥ विष्णु: । यथा । शिखण्डी नहुषो वृषेति तस्य सहस्रनामस्तोत्रम् ॥ ( शिव: । यथा, महाभारते । १३ । १७ । ३१ ।
"जटी चर्म्मी शिखण्डी च सर्व्वाङ्ग: सर्व्व-
भावन: ॥")

शिखरं, क्ली, ( शिखास्यास्तीति । "शृङ्गश-कठजिति ।" ४ । २ । ८० । अभ्रादित्वात् र: हूस्वश्च । ) पर्व्वताग्रम् । तत्पर्य्याय: । कूटम् २ शृङ्गम् ३ । इत्यमर: ॥ शैलाग्रदेशकम् ४ । इति शब्दरत्नावली ॥ ( यथा, महाभारते । १ । १९ । २८ ।
"विदारयन् गिरिशिखराणि पत्रिभि: ॥")

शिखर:, पुं क्ली, (शिखास्त्यस्येति । शिखा + र: । हूस्वश्च ।) वृक्षाग्रम् । तत्पर्य्याय: । शिर: २ अग्रम् ३ । इत्यमर: ॥ शिरम् ४ । इति शब्द-रत्नावली ॥ प्राग्रम् ५ । इति राजनिर्घण्ट: ॥ पर्व्वतशृङ्गम् । पुलक: । कक्ष: । पक्वदाड़िमबीजाभमाणिक्यम् । सकलाग्रम् । इति मेदिनी ॥ कोटि: । इति त्रिकाण्डशेष: ॥

शिखरवासिनी, स्त्री, ( शिखरे वसतीति । वस + णिनि: । ङीप् । ) दुर्गा । इति त्रिकाण्डशेष: ॥

शिखरा, स्त्री, मूर्व्वा । इति शब्दचन्द्रिका ॥

शिखरिणी, स्त्री, रसाला । वृत्तभेद: । नारीरत्नम् । मल्लिका । रोमावली । इति मेदिनी ॥ वृत्तभेदो यथा,—
"रसै रुद्रैश्छिन्ना य-म-न-स-भला ग: शिख-
रिणी ।
कराद्दस्य भ्रष्टे ननु शिखरिणी द्रक्ष्यति शिशो-
र्विलीना: स्म: सत्यं नियतमवधेयं तदखिलै: ।
इति व्यग्रा गोपाशुचितनिभृतालापजनितं
स्मितं बिभ्रत् देवो जगदवतु गोवर्द्धनधर: ॥"
इति छन्दोमञ्जर्य्याम् २ स्तवक: ॥
नवमालिका । द्राक्षाविशेष: । इति राजनिर्घण्ट: ॥ मूर्व्वा । इति शब्दचन्द्रिका ॥

शिखरी, [न्] पुं, (शिखरोऽस्यास्तीति । शिखर + इनि: । ) पर्व्वत: । ( यथा, गीतायाम् । १० । २३ ।
"वसूनां पावकश्चास्मि मेरु: शिखरिणाम-
हम् ॥")
वृक्ष: । अपामार्ग: । इति मेदिनी ॥ कोट्ट: । कोयष्टि: । इति हेमचन्द्र: । वन्दाक: । कर्कटशृङ्गी । कुन्दुरुक: । यावनाल: । इति राजनिर्घण्ट: ॥ ( कोटिविशिष्टे, त्रि । यथा, महाभारते । १ । ७४ । ४ ।
"दन्तै: शुक्लै: शिखरिभि: सिंहसंहननो-
महान् ॥")

शिखलोहित:, पुं, वृक्षविशेष: । इति शब्दचन्द्रिका ॥ कुकुरसुड़ा इति भाषा ॥

शिखा, स्त्री, ( शी + "शीङो ह्रस्वश्च ।" उणा० ५ । २४ । इति ख: ह्रस्वो गुणाभावश्च । स्त्रियां टाप् । ) अग्निज्वाला । तत्पर्य्याय: । ज्वाल: २ कील: ३ अर्च्चि: ४ हेति: ५ शिखा ६ । इत्यमर: ॥ ( यथा, माघे, । १ । २० ।
"विदिद्युते वाड़वजातवेदस:
शिखाभिराश्लिष्ट इवाम्भसां निधि: ॥")
पिङ्गलशिखादे: शुभसूचकत्वं यथा, वायुपुराणे ।
"अर्च्चिष्मान् पिङ्गलशिख: सर्पि:काञ्चनसन्निभ: ।
स्निग्ध: प्रदक्षिणश्चैव वह्नि: स्यात् कार्य्य-
सिद्धये ॥"*॥
अग्नेरशुभलक्षणं यथा । ब्रह्मपुराणे ।
"अल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके ।
आर्द्रकाष्ठैश्च सम्पन्ने फुत्कारवति पावके ॥
कृष्णार्च्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम् ।
आहुतीर्जुहुयात् यस्य तस्य नाशो भवेत्
ध्रुवम् ॥"
इति तिथितत्त्वम् ॥*॥
शिरोमध्यस्थकेश: । तत्पर्य्याय: । चूड़ा २ केशपाशी ३ । इत्यमर: ॥ जुटिका ४ जूटिका ५ । इति शब्दरत्नावली ॥ केशी ६ शिखण्डिका ७ । इति हेमचन्द्र: ॥ * ॥ गायत्त्र्या शिखाबन्धन यथा,—
"गायत्त्र्या तु शिखां बद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रत: ।
जुटिकाञ्च ततो बद्ध्वा तत: कर्म्म समारभेत् ॥"*
शूद्रस्य शिखाबन्धे मन्त्रो यथा,—
"ब्रह्मवाणीसहस्राणि शिववाणी शतानि च ।
विष्णोर्नामसहस्रेण शिखाबन्धं करोम्यहम् ॥"*
शिखामोचनमन्त्रो यथा,—
"गच्छन्तु सकला देवा ब्रह्मविष्णुमहेश्वरा: ।
तिष्ठत्वचाचला लक्ष्मी: शिखामुक्तं करोम्य-
हम् ॥"*॥
शिखाबन्धनानन्तरमाचमनं यथा,—
"निबद्धशिख आसीनो द्विज आचमनं चरेत् ।
कृत्वोपवीतं सव्येऽंशे वाङ्मन:कायसंयत: ॥"*॥
मुक्तशिखस्याचमने दोषो यथा,—
"शिर: प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा ।
अकृत्वा पादयो: शौचं आचान्तोऽप्यशुचि-
र्भवेत् ॥"
इति आह्निकतत्त्वम् ॥*॥
शाखा । वर्हिचूड़ा । ( यथा, महाभारते । १२ । २८२ । ५३ ।
"रम्भागतमथाम्बानां शिखोद्भेदश्च वर्हिणाम् ॥")
लाङ्गलिकी । अग्रमात्रम् । ( यथा, भागवते । ३ । १३ । ४४ ।
"सटाशिखोद्धूतशिवाम्बुबिन्दुभि: ॥" )
चूड़ामात्रम् । प्रपदम् । इति मेदिनी ॥ प्रधानम् । शिफा । किरणं: । इति हेमचन्द्र: ॥ (यथा, कथासरित्सागरे । २१ । ८५ ।
"स्फुरद्रत्नशिखाजालं धाम्ना मोहतमोप-
हम् ॥")
ज्वरभेद: । इति शब्दरत्नावली ॥

शिखाकन्दं, क्ली, ( शिखायुक्त: कन्दो यस्य । ) गृञ्जनम् । इति राजनिर्घण्ट: ॥

शिखाण्डक:, पुं, काकपक्ष: । इति हेमचन्द्र: ॥

शिखातरु:, पुं, ( शिखाया; दीपशिखायास्तरुरिव । ) दीपवृक्ष: । इति त्रिकाण्डशेष: ॥ पिलसुज इति भाषा ॥

शिखाधर:, पुं, ( शिखाया धर: । ) मयूर: । इति शब्दमाला ॥ मञ्जुघोष: । इति त्रिकाण्डशेष: ॥

शिखाधार:, पुं, (शिखां धरतीति । धृ + अण् ।) मयूर: । इति शब्दरत्नावली ॥

शिखामूलं, क्ली, ( शिखायुक्तं मूलं यस्य । ) गृञ्जनम् । इति राजनिर्घण्ट: ॥

शिखालु:, पुं, मयूरशिखा । इति राजनिर्घण्ट: ॥

शिखावती, स्त्री, (शिखा विद्यतेऽस्या: । शिखा + मतुप् । मस्य व: । स्त्रियां ङीप् ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

शिखावर:, पुं, ( शिखा विद्यते अस्य । शिखा + "दन्तशिखात् संज्ञायाम् ।" ५ । २ । ११३ । इति वलच् । रस्य लत्वम् । ) पनसवृक्ष: । इति शब्दमाला ॥

शिखावल:, पुं, ( शिखा विद्यतेऽस्य । शिखा + "दन्तशिखात् संज्ञायाम् ।" ५ । २ । ११३ । इति वलच् । ) मयूर: । इत्यमर: ॥ (शिखावल-नगरम् । शिखावला स्थूणा । इति काशिका ॥)